धर्म्मे गुरौ तदभावात्” दीधितिरुक्तेः शक्यतावच्छेदकत्वं विषयतावच्छेदकत्ववत् गुरुधर्म्मस्यापि स्वीकृतमाकरे।

**अवच्छेदकत्वनिरुक्ति** स्त्री रघुनाथशिरोमणिकृते अवच्छेदकतापदार्थनिर्णायके अनुमानखण्डान्तर्गते ग्रन्थभेदे।

**अवच्छेद्य** त्रि० अव+छिद्–ण्यत्। १छेदनार्हे २अवधार्य्ये विशेषणीये ३अवच्छेदार्हे च पदार्थे यथा दण्डत्वेनावच्छेद्या घटादिकारणता घटत्वेनावच्छेद्या घटप्रतियोगिता।

**अवजय** पु० अव+जि–अच्। पराजये “येनेन्द्रलोकावजयाय दृप्तः” रघुः।

**अवज्ञा** स्त्री अव+ज्ञा–अङ्। “अनादरे। आत्मन्यवज्ञां शिथिलीचकार” रघुः। “गत्यर्थमन्यतेर्द्वे चेष्टावज्ञयोः” मुग्ध०। “अविज्ञावज्ञेयं परितपति नोच्चैरपि बुधम्” उद्भटः।

**अवज्ञात** त्रि०अव–ज्ञा–क्त। १अनादृते २तिरस्कृते ३कृतावमाने च

**अवज्ञान** न० अव+ज्ञा–भावे ल्युट्। १अवमाने २तिरस्कारे ३अनादरे “ईप्सितं तदवज्ञानात् विद्धि सार्गलमात्मनः” रघुः

**अवज्ञेय** त्रि०अव+ज्ञा–कर्म्मणि यत्। १अनादरणीये २तिरस्कार्य्ये “विप्रा हि क्षत्रियात्मानो नावज्ञेयाः कदाचन” या०स्मृ०।

**अवट** पु०अव–अटन्। १गर्त्ते, २कूपे, । “रक्षसां गतसत्त्वानामेष धर्म्मः सनातनः। अवटे ये निधीयन्ते” रामा०। “भूतौदनो निवेद्यश्च स्वभ्रापस्मारिणोऽवटे” सुश्रु० “अवटेष्ववनयति” शत०ब्रा०। ३देहस्य निम्नस्थाने कण्ठमूलादौ च “अवटश्चैवमेतानि स्थानान्यत्र शरीरके” या०स्मृ० “शरीरे यः अवटः कश्चिन्निम्नो देशः कण्ठमूलकक्षादि” मिता० ४ऐन्द्रजालिकजीविकावति च गर्गा० यञ् आवट्यः। अवटभवे त्रि०। [आधारे ल्युट्। नरकभेदे नरकशब्दे विवृतिः।

**अवटनिरोधन** पु० अवटे गर्त्ते निरुध्यतेऽत्र अव+नि+रुध

**अवटि** स्त्री अव+अटि। १गर्त्ते २कूपे च वा ङीप् अवटीत्यपि।

**अवटीट** त्रि० अवनता नासिका प्रा०स० नतार्थे नासायाः टीटादेशः अर्श आदित्वादच्। (खांदा) नतनासिके जने।

**अवटु** पु०अव+टीक–मितद्र्वा०डु। १गर्त्ते, २वृक्षभेदे, ३कूपे च। ४ग्रीवापश्चाद्भागे, ५ग्रीवाया उन्नतभागे च स्त्री ४देहस्थे निम्नदेशे “अवटुश्चैवमेतानि स्थानान्यत्र शरीरके” इति या०स्मृ० पाठान्तरम् “अवटावथ हन्वोश्च प्रगृह्य ग्रीवमयेन्नरम्” सुश्रु०। न०त० ५वटुभिन्ने पु०।

**अवटुज** पु०अवटौ जायते जन–ड ७त०। शिरःस्थचरमकेशे घाटास्थकेशे “रागवानवटुजेष्ववकृष्य” माघः।

**अवटोदा** स्त्री न०त०अवटस्य कूपस्योदकमिव उदकमस्याः उदादेशः। भारतवर्षीये नदीभेदे।

**अवडङ्क** पु० अवगतो डङ्कः शब्दो यस्मात्। छट्टस्थाने जटा०।

**अवडीन** न०अव+डी–भावे क्त। अवरोहणरूपे पक्षिगतिभेदे।

**अवत** पु० अव–अटच् वेदे पृ० टस्य तः। अवटरूपे कूपादौ निरु० “सिक्तामवतम्” ऋ०१,१३०,२ “अवतमवटमिति” भा० “अवते न कोशम्” ऋ०४,१७,१६।

**अवतंस** पु०न० अव–तनुस–घञ्। १कर्णपूरे, २शिरोभूषाभेदे च। “कल्पावतंसद्विगुणाञ्चलत्वम्” “स्वगाहनक्षोभचलावतंसाः” “गणा नमेरुप्रसवावतंसाः” इति च कुमा०।

**अवतंसित** त्रि० अव+तनुस–क्त। भूषिते “समदनमवतंसितेऽधिकर्णम्” माघः। वा अल्लोपे वतंसितोऽप्यत्र।

**अवतमस** न०अवततं व्याप्तं तमः प्रा०स०अच् समा०। व्याप्तान्धकारे। “अवतमसभिदायै भास्वताभ्युद्गतेन” माघः।

**अवतरण** अव+तॄ–भावे ल्युट्। तीरादिप्रदेशात् १जलाद्यवगाहाद्यर्थमवरोहणे। २अन्यरूपेण प्रादुर्भावे “अंशावतरणम्” भा०आ०प०। वस्तुमात्रस्य स्वस्थानात् ३अवरोहणे (नामा) “स्तन्यावतरणे चैव ज्वरो दोषैः प्रवर्त्तते। स्त्रीणामप्रजातानां स्तन्यावतरणे च यः” सुश्रु०। अवतीर्य्यते येन करणे ल्युट्। नद्यादेः सोपानादौ ४तीर्थे।

**अवतरणी** स्त्री अवतरति ग्रन्थोऽनया अव+तॄ करणे ल्युट्। ग्रन्थप्रस्तावार्थं प्रथममुपोद्घातरूपायां सङ्गतौ (आभास) इत्याख्यायां २परिपाट्याञ्च स्वार्थे कन् अवतरणिकाप्यत्र।

**अवतान** पु० अव+तन–घञ् कर्म्मणि घञ्। १सन्ताने २अधोमुखे ३लताप्रताने च “लताशतैरवततामवतानशतैस्तथा” रामा०।

**अवतार** पु०अव+तॄ करणे घञ्। १तीर्थे, (पुष्करिण्यादेः सोपानपङ्क्तौ) “रुद्धे गजेन सरितः सरुषाऽवतारे” माघः। भावे घञ्। २प्रादुर्भावे “नवावतारं कमलादिवोत्पलम्” मा भूत्परीवादनवावतारः” इति च रघुः ३देवानामंशावेशवशेन प्रादुर्भावे च। “अवताराह्यसंख्येयाः” इत्युक्तेः तेषां बहुत्वेऽपि प्राधान्याद्दशैव विष्णोरवतारा शास्त्रप्रसिद्धाः यथा “मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः। रामो रामश्च रामश्च बुद्धः कल्की च ते दश” पुरा० मुण्डमालायां तु प्रकृतेरेव एते अवताराउक्ताः ‘प्रकृतिर्विष्णुरूपात पुंरूपश्च महेश्वरः। एवं प्रकृतिभेदेन भेदास्तु प्रकृतेर्दश। कृष्णरूपा कालिका स्यात् रामरूपा च तारिणी। वगला कूर्म्ममूर्त्तिः स्यात् मीनो धूमावती भवेत्। छिन्नमस्ता नृसिंहः स्याद्वराहश्चैव भैरवी। सुन्दरी जामदग्न्यः स्यात् वामनो भुवनेश्वरी। कमला